अथ यमस्मृतिः

श्रीगणेशायनमः

अथ प्रायश्चित्तवर्णनम्

अथातो ह्यस्य धर्मस्य प्रायश्चित्ताभिधायकम्
चतुर्णामपि वर्णानां धर्मशास्त्रं प्रवर्त्तते १
जलाग्न्युद्बन्धनभ्रष्टाः प्रव्रज्यानशनच्युताः
विषप्रपतनप्रायशस्त्रघातच्युताश्च ये २
सर्वे ते प्रत्यवसिताः सर्वलोकवहिष्कृताः
चान्द्रायणेन शुध्यन्ति तप्तकृच्छ्रद्वयेन वा ३
उभयावसिताः पापा येऽग्राम्यशरणच्युताः
इन्दुद्वयेन शुध्यन्ति दत्त्वा धेनुं तथा वृषम् ४
गोब्राह्मणहनं दग्ध्वा मृतमुद्बन्धनेन च
पाशं तस्यैव छित्त्वा तु तप्तकृच्छ्रं समाचरेत् ५
कृमिभिर्व्रणसंभूतैर्मक्षिकाश्चोपघातितः
कृच्छ्रार्द्धं संप्रकुर्वीत शक्त्या दद्यात्तु दक्षिणाम् ६
ब्राह्मणस्य मलद्वारे पूयशोणितसम्भवे
कृमिभुक्तव्रणे मौञ्जीहोमेन स विशुध्यति ७
यः क्षत्रियस्तथा वैश्यः शूद्रश्चाप्यनुलोमजः
ज्ञात्वा भुङ्क्ते विशेषेण चरेच्चान्द्रायणं व्रतम् ८
कुक्कुटाण्डप्रमाणन्तु ग्रासञ्च परिकल्पयेत्
अन्यथाहारदोषेण न स तत्र विशुध्यति ९
एकैकं वर्द्धयेच्छुक्ले कृष्णपक्षे च ह्रासयेत्
अमावास्यां न भुञ्जीत एष चान्द्रायणोविधिः १०
सुरान्यमद्यपानेन गोमांसभक्षणे कृते
तप्तकृच्छ्रञ्चरेद्विप्रस्यत्पापस्तु प्रणश्यति ११
प्रायश्चित्ते ह्युपक्रान्ते कर्ता यदि विपद्यते
पूतस्तदहरेवापि इहलोके परत्र च १२

यावदेकः पृथक् द्रव्यः प्रायश्चित्तेन शुध्यति
अपरास्ते न च स्पृश्यास्तेऽपि सर्वे विगर्हिताः १३
अभोज्याश्चाप्रतिग्राह्या असंपाठ्या विवाहिनः
पूयन्तेऽनुव्रते चीर्णे सर्वे ते ऋक्थभागिनः १४
ऊनैकादशवर्षस्य पञ्चवर्षात् परस्य च
प्रायश्चित्तं चरेद् भ्राता पिता वान्योऽपि बान्धवः १५
अतोबालतरस्यापि नापराधो न पातकम्
राजदण्डो न तस्यास्ति प्रायश्चित्तं न विद्यते १६
अशीतीर्यस्य वर्षाणि बालोवाप्यूनषोडशः
प्रायश्चित्तार्धमर्हन्ति स्त्रियोरोगिण एव च १७
अस्तंगतो यदा सूर्यश्चाण्डालरजकस्त्रियः
संस्पृष्टास्तु तदा कैश्चित् प्रायश्चित्तं कथं भवेत् १८
जातरूपं सुवर्णञ्च दिवानीतं च यज्जलम्
तेन स्नात्वा च पीत्वा च सर्वे ते शुचयः स्मृताः १९
दासनापितगोपालकुलमित्रार्द्धसीरिणः
एते शूद्रेषु भोज्यान्ना यश्चात्मनं निवेदयेत् २०
अन्नं शूद्रस्य भोज्यं वा ये भुञ्जन्त्यबुधा नराः
प्रायश्चित्तं तथा प्राप्तं चरेच्चान्द्रायणं व्रतम् २१
प्राप्ते द्वादशमे वर्षे यः कन्यां न प्रयच्छति
मासि मासि रजस्तस्याः पिता पिबति शोणितम् २२
माता चैव पिता चैव ज्येष्ठोभ्राता तथैव च
त्रयस्ते नरकं यान्ति दृष्ट्वा कन्यां रजस्वलाम् २३
यस्तां विवाहयेत् कन्यां ब्राह्मणो मदमोहितः
असंभाष्यो ह्यपाङ्क्तेयः स विप्रो वृषलीपतिः २४
वन्ध्या तु वृषली ज्ञेया वृषली तु मृतप्रजाः
शूद्री तु वृषली ज्ञेया कुमारी तु रजस्वला २५
यत् करोत्येकरात्रेण वृषलीसेवनाद् द्विजः
तद्भैक्षभुग् जपन्नित्यं त्रिभिर्वर्षैर्व्यपोहति २६

स्ववृषं या परित्यज्यान्यवृषेण वृहस्पतिः
वृषली सा तु विज्ञेया न शूद्री वृषली भवेत् ७२
वृषलीफेनपीतस्य निःश्वासोपहतस्य च
तस्याञ्चैव प्रसूतस्य निष्कृतिर्नैव विद्यते २८
श्वित्रकुष्ठी तथा चैव कुनखी श्यावदन्तकः
रोगी हीनातिरिक्ताङ्गः पिशुनोमत्सरस्तथा २९
दुर्भगो हि तथा षण्डः पाषण्डी वेदनिन्दकः
हैतुकः शूद्रयाजी च अयाज्यानाञ्च याजकः ३०
नित्यं प्रतिग्रहे लुब्धोयाचकोविषयात्मकः
श्यावदन्तोऽथ वैद्यश्च असदालापकस्तथा ३१
एते श्राद्धे च दाने च वर्जनीयाः प्रयत्नतः ३२
ततोदेवलकश्चैव भृतकोवेदविक्रयी
एते वर्ज्याः प्रयत्नेन एतद्भास्वतिरब्रवीत् ३३
एतान्नियोजयेद्यस्तु हव्ये कव्ये च कर्मणि
निराशाः पितरस्तस्य यान्ति देवामहर्षिभिः ३४
अग्रे माहिषिकं दृष्ट्वा मध्ये तु वृषलीपतिम्
अन्ते वार्धुषिकं दृष्ट्वा निराशाः पितरोगताः ३५
महिषीत्युच्यते भार्या या चैव व्यभिचारिणी
तान् दोषान् क्षमते यस्तु स वै माहिषिकः स्मृतः ३६
समार्घन्तु समुद्धृत्य महार्घं यः प्रयच्छति
स वै वार्धुषिकोनाम ब्रह्मवादिषु गर्हितः ३७
यावदुष्णं भवत्यन्नं यावद्भुञ्जन्ति वाग्यताः
अश्नन्ति पितरस्तावद्यावन्नोक्ता हविर्गुणाः ३८
हविर्गुणा न वक्तव्याः पितरो यत्र तर्पिताः
पितृभिस्तर्पितैः पश्चाद्वक्तव्यं शोभनं हविः ३९
यावतो ग्रसते ग्रासान् हव्यकव्येषु मन्त्रवित्
तावतोग्रसते पिण्डान् शरीरे ब्रह्मणः पिता ४०
उच्छिष्टोच्छिष्टसंस्पृष्टः शुना शूद्रेण वा द्विजः

उपोष्य रजमीमेकां पञ्चगव्येन शुध्यति ४१
अनुच्छिष्टेन संस्पृष्टे स्नानमात्रं विधीयते
तेनैवोच्छिष्टसंस्पृष्टः प्राजापत्यं समाचरेत् ४२
यावद्विप्रा न पूज्यन्ते सम्भोजनहिरण्यकैः
तावच्चीर्णव्रतस्यापि तत्पापं न प्रणश्यति ४३
यद्वेष्टितं काकबलाकचिल्लैरमेध्यलिप्तं तु भवेच्छरीरम्
गात्रे मुखे च प्रविशेच्च सम्यक् स्नानेन लेपोपहतस्य शुद्धिः ४४
ऊर्ध्वं नाभेः करौ मुक्त्वा यदङ्गमुपहन्यते
ऊर्ध्वं स्नानमधःशौचं तन्मात्रेणैव शुध्यति ४५
अभक्ष्याणामपेयानामलेह्यानाञ्च भक्षणे
रेतोमूत्रपुरीषाणां प्रायश्चित्तं कथं भवेत् ४६
पद्मोडुम्बरविल्वाश्च कुशाश्वत्थपलाशकाः
एतेषामुदकं पीत्वा षड्रात्रेणैव शुध्यति ४७
यः प्रत्यवसितोविप्रः प्रव्रज्याग्निर्निरापदि
अनाहिताग्निर्वर्त्तेत गृहित्वञ्च चिकीर्षति ४८
आचरेत्त्रीणि कृच्छ्राणि चरेच्चान्द्रायणानि च
जातकर्मादिभिः प्रोक्तैः पुनः संस्कारमर्हति ४९
तूलिका उपधानानि पुष्पं रक्ताम्बराणि च
तूलिका उपधानानि पुष्पं रक्ताम्बराणि च
शोषयित्वा प्रतापेन प्रोक्षयित्वा शुचिर्भवेत् ५०
देशं कालं तथात्मानं द्रव्यं द्रव्यप्रयोजनम्
उपपत्तिमवस्थाञ्च ज्ञात्वा धर्मं समाचरेत् ५१
रथ्याकर्दमतोयानि नावायस तृणानि च
मारुतार्केण शुध्यन्ति पक्वेष्टकचितानि च ५२
आतुरे स्नानसम्प्राप्ते दशकृत्वोह्यनातुरः
स्नात्वा स्नात्वा स्पृशेत्तन्तु ततः शुध्येत आतुरः ५३
रजकश्चर्मकारश्च नटोवुरुड एव च
कैवर्त्तमेदभिल्लाश्च सप्तैते चान्त्यजाः स्मृताः ५४

एषां गत्वा तु योषां वै तप्तकृच्छ्रं समाचरेत् ५५
स्त्रीणां रजस्वलानान्तु स्पृष्टास्पृष्टि यदा भवेत्
प्रायश्चित्तं कथं तासां वर्णे वर्णे विधीयते ५६
स्पृष्ट्वा रजस्वलां यान्तु सगोत्राञ्च सभर्त्तृकाम्
कामादकामतो वापि स्नात्वा कालेन शुध्यति ५७
स्पृष्ट्वा रजस्वलान्योन्यं ब्राह्मणी शूद्रजा तथा
कृच्छ्रेण शुध्यते पूर्वा शूद्रा पादेन शुध्यति ५८
स्पृष्ट्वा रजस्वलान्योन्यं क्षत्रिया शूद्रजा तथा
पादहीनं चरेत् पूर्वा पादार्द्धन्तु तथोत्तरा ५९
स्पृष्टा रजस्वलान्योन्यं वैश्यजा शूद्रजा तथा
कृच्छ्रपादं चरेत् पूर्वा तदर्द्धन्तु तथोत्तरा ६०
स्पृष्टा रजस्वला चैव श्वाजजम्बूकरासभैः
तावत्तिष्ठेन्निराहारा स्नात्वा कालेन शुध्यति ६१
स्पृष्टा रजस्वला कैश्चिच्चाण्डालैररजस्वला
प्राजापत्येन कृच्छ्रेण प्राणायामशतेन च ६२
विप्रः स्पृष्टोनिशायाञ्च उदक्या पतितेन च
दिवानीतेन तोयेन स्नापयेच्चाग्निसन्निधौ ६३
दिवार्क रश्मिसंस्पृष्टं रात्रौ नक्षत्ररश्मिभिः
सन्ध्योभयोश्च सन्ध्यायाः पवित्रं सर्वदा जलम् ६४
अपः करनखस्पृष्टाः पिबेदाचमने द्विजः
सुरां पिबति सुव्यक्तं यमस्य वचनं यथा ६५
खातवाप्योस्तथा कूपे पाषाणैः शस्त्रघातनैः
यष्ट्या तु घातने चैव मृत्पिण्डे गोकुलेन च ६६
रोधने बन्धने चैव स्थापिते पुष्कले तथा
काष्ठे वनस्पतौ रोधसङ्कटे रज्जुवस्त्रयोः ६७
एतत्ते कथितं सर्वं प्रमादस्थानमुत्तमम्
यत्र यत्र मृता गावः प्रायश्चित्तं समाचरेत् ६८
दारुणा घातने कृच्छ्रं पाषाणैर्द्विगुणं भवेत्

अर्द्धकृच्छ्रन्तु खाते स्यात् पादकृच्छ्रन्तु पादपे ६९
शस्त्रघाते त्रिकृच्छ्राणि यष्टिघाते द्वयं चरेत् ७०
कृच्छ्रेण वस्त्रघातेऽपि गोघ्नश्चेति विशुध्यति
योवर्त्तयति गोमध्ये नदीकान्तारमन्तिके ७१
रोमाणि प्रथमे पादे द्वितीये श्मश्रु वापयेत्
तृतीये तु शिखा धार्या चतुर्थे सशिखं वपेत् ७२
न स्त्रीणां वपनं कुर्यात् न च सा गामनुव्रजेत्
न च रात्रौ वसेद्गोष्ठे न कुर्याद् वैदिकीं श्रुतिम् ७३
सर्वान् केशान् समुद्धृत्य छेदयेदङ्गुलिद्वयम्
एवमेव तु नारीणां शिरसो वपनं स्मृतम् ७४
मृतकेन तु जातेन उभयोः सूतकं भवेत्
पातकेन तु लिप्तेन नास्य सूतकिता भवेत् ७५
चत्वारि खलु कर्माणि सन्ध्याकाले विवर्जयेत्
आहारं मैथुनं निद्रां स्वाध्यायञ्च चतुर्थकम् ७६
आहाराज्जायते व्याधिः क्रूरगर्भश्च मैथुने
निद्रा श्रियो निवर्त्तन्ते स्वाध्याये मरणं ध्रुवम् ७७
अज्ञानात्तु द्विजश्रेष्ठ वर्णानां हितकाम्यया
मया प्रोक्तमिदं शास्त्रं सावधानोऽवधारय ७८

इति यमप्रोक्तं धर्मशास्त्रं समाप्तम्

तत्सद्ब्रह्मणे नमः

अथ लघुयमस्मृतिः

श्रीगणेशाय नमः

अथ नानाविध प्रायश्चित्तवर्णनम्

श्रुत्यस्मृत्युदितं धर्मं वर्णानामनुपूर्वशः
प्राब्रवीदृषिभिः पृष्टो मुनीनामग्रणीर्यमः १
यो भुञ्जानोऽशुचिर्वाऽपि चण्डालं पतितं स्पृशेत्
क्रोधादज्ञानतो वाऽपि तस्य वक्ष्यामि निष्कृतिम् २
षड्रात्रं वा त्रिरात्रं वा यथासंख्यं समाचरेत्
स्नात्वा त्रिषवणं विप्रः पञ्चगव्येन शुध्यति ३
भुञ्जानस्य तु विप्रस्य कदाचित्स्रवते गुदम्
उच्छिष्टत्वेऽशुचित्वे च तस्य शौचं विनिर्दिशेत् ४
पूर्वं कृत्वा द्विजः शौचं पश्चादप उपस्पृशेत्
अहोरात्रोषितो भूत्वा पञ्चगव्येन शुध्यति ५
निगिरन्यदि मेहेत भुक्त्वा वा मेहने कृते
अहोरात्रोषितो भूत्वा जुहुयात्सर्पिषाऽऽहुतीः ६
यदा भोजनकाले स्यादशुचिर्ब्राह्मणः क्वचित्
भूमौ निधाय तद्ग्रासं स्नात्वा शुद्धिमवाप्नुयात् ७
भक्षयित्वा तु तद्ग्रासमुपवासेन शुध्यति
अशित्वा चैव तत्सर्वं त्रिरात्रेणैव शुध्यति ८
अश्नतश्चेद्विरेकः स्यादस्वस्थस्त्रिशतं जपेत्
स्वस्थस्त्रीणि सहस्राणि गायत्र्याः शोधनं परम् ९
चण्डालैः श्वपचैः स्पृष्टो विण्मूत्रे तु कृते द्विजः
त्रिरात्रं तु प्रकुर्वीत भुक्त्वोच्छिष्टः षडाचरेत् १०
उदक्यां सूतिकां वाऽपि संस्पृशेदन्त्यजो यदि
त्रिरात्रेण विशुद्धिः स्यादिति शातातपोऽब्रवीत् ११
रजस्वला तु संस्पृष्टा श्वमातङ्गादिवायसैः
निराहारा शुचिस्तिष्ठेत्कालस्नानेन शुध्यति १२

रजस्वले यदा नार्यावन्योन्यं स्पृशते क्वचित्
शुध्यतः पञ्चगव्येन ब्रह्मकूर्चेन चोपरि १३
उच्छिष्टेन च संस्पृष्टा कदाचित्स्त्री रजस्वला
कृच्छ्रेण शुद्धिमाप्नोति शूद्रा दानोपवासतः १४
अनुच्छिष्टेन संस्पृष्टे स्नानं येन विधीयते
तेनैवोच्छिष्टसंस्पृष्टः प्राजापत्यं समाचरेत् १५
ऋतौ तु गर्भशङ्कित्वात्स्नानं मैथुनिनः स्मृतम्
अनृतौ तु स्त्रियं गत्वा शौचं मूत्रपुरीषवत् १६
उभावप्यशुची स्यातां --नी शयनं गतौ
शयनादुत्थिता नारी शुचिः स्यादशुचिः पुमान् १७
भर्तुः शरीरशुश्रूषां दौरात्म्यादप्रकुर्वती
दण्डया द्वादशकं नारी वर्षं त्याज्या धनं विना १८
त्यजन्तोऽपतितान्बन्धून्दण्डया उत्तमसाहसम्
पिता हि पतितः कामं न तु माता कदाचन १९
आत्मानं घातयेद्यस्तु रज्ज्वादिभिरुपक्रमैः
मृतोऽमेध्येन लेप्तव्यो जीवतो द्विशतं दमः २०
दण्डयास्तत्पुत्रमित्राणि प्रत्येकं पणिकं दमम्
प्रायश्चित्तं ततः कुर्युर्यथाशास्त्रप्रचोदितम् २१
जलाद्युद्बन्धनभ्रष्टाः प्रव्रज्यानाशकच्युताः
विषप्रपतनप्रायशस्त्रघातहताश्च ये २२
नवैते प्रत्यवसिताः सर्वलोकबहिष्कृताः
चान्द्रायणेन शुध्यन्ति तप्तकृच्छ्रद्वयेन वा २३
उभयावसितः पापः श्यामाच्छबलकाच्च्युतः
चान्द्रायणाभ्यां शुध्येत दत्त्वा धेनुं तथा वृषम् २४
श्वशृगालप्लवङ्गाद्यैर्मानुषैश्च रतिं विना
दष्टः स्नात्वा शुचिः सद्यो दिवा संध्यासु रात्रिषु २५
अज्ञानाद्ब्राह्मणो भुक्त्वा चण्डालान्नं कदाचन
गोमूत्रयावकाहारो मासार्धेन विशुध्यति २६

गोब्राह्मणगृहं दग्ध्वा मृतं चोद्बन्धनादिना
पाशांश्छित्त्वा तथा तस्य कृच्छ्रमेकं चरेद्द्विजः २७
चण्डालपुक्कसानां च भुक्त्वा गत्वा च योषितम्
कृच्छ्राब्दमाचरेज्ज्ञानादज्ञानादैन्दवद्वयम् २८
कापालिकान्नभोक्तॄणां तन्नारीगामिनां तथा
कृच्छ्राब्दमाचरेज्ज्ञानादज्ञानादैन्दवद्वयम् २९
अगम्यागमने विप्रो मद्यगोमांसभक्षणे
तप्तकृच्छ्रपरिक्षिप्तो मौर्वीहोमेन शुध्यति ३०
महापातककर्तारश्चत्वारोऽप्यविशेषतः
अग्निं प्रविश्य शुध्यन्ति स्थित्वा वा महति क्रतौ ३१
रहस्यकरणेऽप्येवं मासमभ्यस्य पूरुषः
अघमर्षणसूक्तं वा शुध्येदन्तर्जले स्थितः ३२
रजकश्चर्मकारश्च नटो बुरुड एव च
कैवर्तमेदभिल्लाश्च सप्तैते अन्त्यजाः स्मृताः ३३
भुक्त्वा चैषां स्त्रियो गत्वा पीत्वाऽपः प्रतिगृह्य च
कृच्छ्राब्दमाचरेज्ज्ञानादज्ञानादैन्दवद्वयम् ३४
मातरं गुरुपत्नीं च स्वसृदुहितरौ स्नुषाम्
गत्वैताः प्रविशेदग्निं नान्या शुद्धिर्विधीयते ३५
राज्ञां प्रव्रजितां धात्रीं तथा वर्णोत्तमामपि
कृच्छ्रद्वयं प्रकुर्वीत सगोत्रामभिगम्य च ३६
अन्यासु पितृगोत्रासु मातृगोत्रगतास्वपि
परदारेषु सर्वेषु कृच्छ्रं सांतपनं चरेत् ३७
वेश्याभिगमने पापं व्यपोहन्ति द्विजातयः
पीत्वा सकृत्सुतप्तं च पञ्चरात्रं कुशोदकम् ३८
गुरुतल्पव्रतं केचित्केचिद्ब्रह्महणो व्रतम्
गोघ्नस्य केचिदिच्छन्ति केचिच्चैवावकीर्णिनः ३९
दण्डादूर्ध्वप्रहारेण यस्तु गां विनिपातयेत्
द्विगुणं गोव्रतं तस्य प्रायश्चित्तं विनिर्दिशेत् ४०

अङ्गुष्ठमात्रस्थूलस्तु बाहुमात्रप्रमाणकः
सार्द्रश्च सपलाशश्च गोदण्डः परिकीर्तितः ४१
गवां निपातने चैव गर्भोऽपि संपतेद्यदि
एकैकशश्चरेत्कृच्छ्रं यथापूर्वं तथा पुनः ४२
पादमुत्पन्नमात्रे तु द्वौ पादौ गात्रसंभवे
पादोनं कृच्छ्रमाचष्टे हत्वा गर्भमचेनतम् ४३
अङ्गप्रत्यङ्गसंपूर्णे गर्भे रेतःसमन्विते
एकैक्रशश्चरेत्कृच्छ्रमेषा गोघ्नस्य निष्कृतिः ४४
बन्धने रोधने चैव पाषाणे वा गवां रुजा
संपद्यते चेन्मरणं निमित्ती नैव लिप्यते ४५
मूर्छितः पतितो वाऽपि दण्डेनाभिहतस्तथा
उत्थाय षट्पदं गच्छेत्सप्त पञ्च दशापि वा ४६
ग्रासं वा यदि गृह्णीयात्तोयं वाऽपि पिवेद्यदि
पूर्वव्याधिप्रनष्टानां प्रायश्चित्तं न विद्यते ४७
काष्ठलोष्टाश्मभिर्गावः शस्त्रैर्वा निहता यदि
प्रायश्चित्तं कथं तत्र शास्त्रे शास्त्रे निगद्यते ४८
काष्ठे सांतपनं कुर्यात्प्राजापत्यं तु लोष्टके
तप्तकृच्छ्रं तु पाषाणे शस्त्रे चाप्यतिकृच्छ्रकम् ४९
औषधं स्नेहमाहारं ददद्गोब्राह्मणेषु तु
दीयमाने विपत्तिः स्यात्प्रायश्चित्तं न विद्यते ५०
तैलभैषज्यपाने च भेषजानां च भक्षणे
निःशल्यकरणे चैव प्रायश्चित्तं न विद्यते ५१
वत्सानां करणठवन्धेन क्रियया भेषजेन तु
सायं संगोपनार्थं च न दोषो रोधबन्धयोः ५२
पादे चैवास्य रोमाणि द्विपादे श्मश्रु केवलम्
त्रिपादे तु शिखावर्जं मूले सर्वं समाचरेत् ५३
सर्वान्केशान्समुद्धृत्य च्छेदयेदङ्गुलद्वयम्
एवमेव हि नारीणां मुण्डमुण्डापनं स्मृतम् ५४

न स्त्रिया वपनं कार्यं न च वीरासनं तथा
न च गोष्ठे निवासं च न गच्छन्तीमनुव्रजेत्
राजा वा राजपुत्रो वा ब्राह्मणो वा बहुश्रुतः
अकृत्वा वपनं तेषां प्रायश्चित्तं विनिर्दिशेत् ५६
केशानां रक्षणार्थं च द्विगुणं व्रतमादिशेत्
द्विगुणे तु व्रते चीर्णे द्विगुणैव तु दक्षिणा ५७
द्विगुणं चेन्न दत्तं च केशांश्च परिरक्षयेत्
पापं न क्षीयते हन्तुर्दाता च नरकं व्रजेत् ५८
अश्रौतस्मार्तविहितं प्रायश्चित्तं वदन्ति ये
तान्धर्मविघ्नकर्तॄंश्च राजा दण्डेन पीडयेत् ५९
न चेत्तान्पीडयेद्राजा कथंचित्काममोहितः
तत्पापं शतधा भूत्वा तमेव परिसर्पति ६०
प्रायश्चित्ते ततश्चीर्णे कुर्याद्ब्राह्मणभोजनम्
विंशतिं गा वृषं चैव दद्यात्तेषां च दक्षिणाम् ६१
कृमिभिर्व्रणसंभूतैर्मक्षिकाभिश्च पातितैः
कृच्छ्रार्धं संप्रकुर्वीत शक्त्या दद्याच्च दक्षिणाम् ६२
प्रायश्चित्तं च कृत्वा वै भोजयित्वा द्विजोत्तमान्
सुवर्णमाषकं दद्यात्ततः शुद्धिर्विधीयते ६३
चण्डालश्वपचैः स्पृष्टे निशि स्नानं विधीयते
न वसेत्तत्र रात्रौ तु सद्यः स्नानेन शुध्यति ६४
अथ वसेद्यदा रात्रावज्ञानादविचक्षणः
तदा तस्य तु तत्पापं शतधा परिवर्तते ६५
उद्गच्छन्ति हि नक्षत्राण्युपरिष्टाच्च ये ग्रहाः
संस्पृष्टे रश्मिभिस्तेषामुदके स्नानमाचरेत् ६६
कुड्यान्तर्जलवल्मीकमूषिकोत्करवर्त्मसु
श्मशाने शौचशेषे च न ग्राह्याः सप्त मृत्तिकाः ६७
इष्टापूर्तं तु कर्तव्यं ब्राह्मणेन प्रयत्नतः
इष्टेन लभते स्वर्गं पूर्तेन मोक्षं समश्नुते ६८

वित्तापेक्षं भवेदिष्टं तडागं पूर्तमुच्यते
आरामश्च विशेषेण देवद्रोणयस्तथैव च ६९
वापीकूपतडागानि देवतायतनानि च
पतितान्युद्धरेद्यस्तु स पूर्तफलमश्नुते ७०
शुक्लया मूत्रं गृह्णीयात्कृष्णाया गोः शकृत्तथा
ताम्रायाश्च पयो ग्राह्यं श्वेताया दधि चोच्यते ७१
कपिलाया घृतं ग्राह्यं महापातकनाशनम्
सर्वतीर्थे नदीतोये कुशैर्द्रव्यं पृथक्पृथक् ७२
आहृत्य प्रणवेनैव ह्युत्थाप्य प्रणवेन च
प्रणवेन समालोडय प्रणवेन तु संपिबेत् ७३
पालाशे मध्यमे पर्णे भाणडे ताम्रमये तथा
पिबेत्पुष्करपर्णे वा ताम्र वा मृणमये शुभे ७४
सूतके तु समुत्पन्ने द्वितीये समुपस्थिते
द्वितीये नास्ति दोषस्तु प्रथमेनैव शुध्यति ७५
जातेन शुध्यते जातं मृतेन मृतकं तथा
गर्भसंस्त्रवणे मासे त्रीणयहानि विनिर्दिशेत् ७६
रात्रिभिर्मासतुलाभिर्गर्भस्त्रावे विशुध्यति
रजस्युपरते साध्वी स्नानेन स्त्री रजस्वला ७७
सगोत्राद्भ्रश्यते नारी विवाहात्सप्तमे पदे
स्वामिगोत्रेण कर्तव्यास्तस्याः पिणडोदकक्रियाः ७८
द्वे पितुः पिणडदानं स्यात्पिणडे पिणडे द्विनामता
षणणां देयास्त्रयः पिणडा एवं दाता न मुह्यति ७९
स्वेन भर्त्रा सह श्राद्धं माता भुक्त्वा सदैवतम्
पितामह्यपि स्वेनैव स्वेनैव प्रपितामही ८०
वर्षे वर्षे तु कुर्वीत मातापित्रोस्तु सत्कृतिम्
अदैवं भोजयेच्छ्राद्धं पिणडमेकं तु निर्वपेत् ८१
नित्यं नैमित्तिकं काम्यं वृद्धिश्राद्धमथापरम्
पार्वणं चेति विज्ञेयं श्राद्धं पञ्चविधं बुधैः ८२

ग्रहोपरागे संक्रान्तौ पर्वोत्सवमहालये
निर्वपेत्त्रीन्नरः पिण्डानेकमेव मृतेऽहनि ८३
अनूढा न पृथक्कन्या पिण्डे गोत्रे च सूतके
पाणिग्रहणमन्त्राभ्यां स्वगोत्राद्भ्रश्यते ततः ८४
येन येन तु वर्णेन या कन्या परिणीयते
तत्समं सूतकं याति तथा पिण्डोदकेऽपि च ८५
विवाहे चैव संवृत्ते चतुर्थेऽहनि रात्रिषु
एकत्वं सा व्रजेद्भर्तुः पिण्डे गोत्रे च सूतके ८६
प्रथमेऽह्नि द्वितीये वा तृतीये वा चतुर्थके
अस्थिसंचयनं कार्यं बन्धुभिर्हितबुद्धिभिः ८७
चतुर्थे पञ्चमे चैव सप्तमे नवमे तथा
अस्थिसंचयनं प्रोक्तं वर्णानामनुपूर्वशः ८८
एकादशाहे प्रेतस्य यस्य चोत्सृज्यते वृषः
मुच्यते प्रेतलोकात्स स्वर्गलोके महीयते ८९
गङ्गातोयेषु यस्यास्थि प्लवते शुभकर्मणः
न तस्य पुनरावृत्तिर्ब्रह्मलोकात्कथंचन ९०
यावदस्थि मनुष्याणां गङ्गातोयेषु तिष्ठति
तावद्वर्ष सहस्राणि स्वर्गलोके महीयते ९१
नाभिमात्रे जले स्थित्वा हृदयेनानुचिन्तयेत्
आगच्छन्तु मे पितरो गृह्णन्त्वेताञ्जलाञ्जलीन् ९२
हस्तौ कृत्वा सुसंयुक्तौ पूरयित्वा जलेन च
गोशृङ्गमात्रमुद्धृत्य जलमध्ये जलं क्षिपेत् ९३
आकाशे च क्षिपेद्वारि वारिस्थो दक्षिणामुखः
पितृणां स्थानमाकाशं दक्षिणा दिक्तथैव च ९४
आपो देवगणाः प्रोक्ता आपः पितृगणास्तथा
तस्मादप्सु जलं देयं पितृणां हितमिच्छता ९५
दिवा सूर्यांशुभिस्तप्तं रात्रौ नक्षत्र मारुतैः
संध्ययोरप्युभाभ्यां च पवित्रं सर्वदा जलम् ९६

स्वभावयुक्तमव्याप्तममेध्येन सदा शुचि
भाण्डस्थं धरणीस्थं वा पवित्रं सर्वदा जलम् ९७
देवतानां पितृणां च जले दद्याञ्जलाञ्जलीन्
असंत्कृतप्रमीतानां स्थले दद्याञ्जलाञ्जलीन् ९८
श्राद्धे हवनकाले च दद्यादेकेन पाणिना
उभाभ्यां तर्पणे दद्यादिति धर्मो व्यपस्थितः ९९

इति लघुयमप्रणीतं धर्मशास्त्रं समाप्तम्

समाप्तेयं यमस्मृतिः

ॐ तत्सद्ब्रह्मणे नमः

अथ बृहद्यमस्मृतिः

श्रीगणेशाय नमः

प्रथमोऽध्यायः

अथ नानाविध प्रायश्चित्तवर्णनम्

अथातो यमधर्मस्य प्रायश्चित्तं व्याख्यास्यामः
चतुर्णामपि वर्णानां प्रायश्चित्तं प्रकल्पयेत् १
ब्राह्मणस्तु शुना दष्टो जम्बूकेन वृकेण वा
उदिते ग्रहनक्षत्रे दृष्ट्वा सद्यः शुचिर्भवेत् २
जलाग्निबन्धनभ्रष्टाः प्रव्रज्यानाशकच्युताः
विषप्रपन्नगात्राश्च शस्त्राघातहताश्च ये ३
नवैते प्रत्यवसिताः सर्वधर्मबहिष्कृताः
चान्द्रायणेन शुध्यन्ति तप्तकृच्छ्रद्वयेन च ४
उभयावसिताः पापा ये शामशबलाच्युताः
इन्दुद्वयेन शुध्यन्ति दत्त्वा धेनुं तथा वृषम् ५
गोब्राह्मणहतं द धं मृतमुद्बन्धनेन तु
पाशं छित्त्वा ततस्तस्य तप्तकृच्छ्रद्वयं चरेत् ६
कृमिभिर्ब्रह्मसंयुक्तं मक्षिकैश्चोपघातितम्
कृच्छ्रार्धं संप्रकुर्वीत शक्त्या दद्यात्तु दक्षिणाम् ७
चाण्डालभाण्डसंस्पृष्टं पीत्वा भूमिगतं जलम्
गोमूत्रयावकाहारः षड्रात्रेण विशुध्यति ८
चाण्डालघटभाण्डस्थं यस्तोयं पिबति द्विजः
तत्क्षणात्क्षिपते यस्तु प्राजापत्येन शुध्यति ९
यदि न क्षिपते तोयं शरीरे यस्य जीर्यति
प्राजापत्यं न दातव्यं कृच्छ्रं सांतपनादिकम् १०
चरेत्सांतपनं विप्रः प्राजापत्यं तु क्षत्रियः
तदर्धं तु चरेद्वैश्यः पादं शूद्रस्य दापयेत् ११
चाण्डालान्नं भक्षयित्वा तद्वत्सलिलमेव च

मासं कृच्छ्रं चरेद्विप्रश्चान्द्रायणमथापि वा १२
गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम्
एकरात्रोपवासश्च कृच्छ्रं सांतपनं स्मृतम् १३
चाण्डालमूर्तिका ये च ये च संकीर्णयोनयः
तेषां दत्त्वा च भुक्त्वा च तप्तकृच्छ्रं समाचरेत् १४
चाण्डालिकासु नारीषु द्विजो मैथुनकारकः
कृत्वाऽघमर्षणं पक्षं शुध्यते च पयोव्रतात् १५
इति श्रीयाम्ये धर्मशास्त्रे प्रथमोऽध्यायः

द्वितीयोऽध्यायः
अथ चान्द्रायणविधिवर्णनम्

नटां शैलूषिकां चैव रजकीं वेणुजीविनीम्
गत्वा चान्द्रायणं कुर्यात्तथा चर्मोपजीविनीम् १
कापालिकान्नभोक्तॄणां तनयागामिनां तथा
अज्ञानात्कृच्छ्रमुद्दिष्टं ज्ञात्वा चैव व्रतद्वयम् २
सुरायाः संप्रपानेन गोमांसभक्षणे कृते
तप्तकृच्छ्रं चरेद्विप्रो मौञ्जीहोमेन शुध्यति ३
गोक्षत्रियं तथा वैश्यं शूद्रं चाप्यनुलोमजम्
ज्ञात्वा विशेषेण ततश्चरेच्चान्द्रायणं व्रतम् ४
कुक्कुटाण्डकमात्रं तु ग्रासं च परिकल्पयेत्
अन्यथाभावदोषेण नवमेऽति च शुध्यति ५
एकैकं वर्धयेद्ग्रासं शुक्ले कृष्णे च ह्रासयेत्
अमायां तु न भुञ्जीत एष चान्द्रायणो विधिः ६
प्रायश्चित्तमुपक्रम्य कर्ता यदि विपद्यते
पूतस्तदहरेद्वाऽपि इह लोके परत्र च ७
यावदेकः पृथग्भाव्यः प्रायश्चित्तं न सेवते
अप्रशस्ता न ते स्पृश्यास्ते सर्वेऽपि विगर्हिताः ८
अभोज्याश्चाप्रतिग्राह्या असंपङ्क्त्या विवाहिकाः

पूयन्ते तु व्रते चीर्णे सर्वे ते रिक्थभागिनः ९

इति श्रीयाम्ये धर्मशास्त्रे द्वितीयोऽध्यायः

तृतीयोऽध्यायः

अथ प्रायश्चित्तवर्णनम्

ऊनैकादशवर्षस्य पञ्चवर्षात्परस्य च
प्रायश्चित्तं चरेद्भ्राता पिता वान्योऽपि बान्धवः १
अतो बालतरस्यापि नापराधो न पातकम्
राजदण्डो न तस्यास्ति प्रायश्चित्तं न विद्यते २
अशीत्यधिकवर्षाणि बालो वाऽप्यूनषोडशः
प्रायश्चित्तार्धमर्हन्ति स्त्रियो व्याधित एव च ३
पितृव्यभ्रातृभार्यां च भगिनीं मातुरेव च
श्वश्रूं पितृष्वसारं च तप्तकृच्छ्रं समाचरेत् ४
राज्ञीमाचार्यशिष्यां वा उपाध्यायस्य योषितः
एता गत्वा स्त्रियो मोहात्षण्मासं कृच्छ्रमाचरेत् ५
द्वौ मासौ भक्ष्यभोज्यं च द्वौ मासौ यावकेन तु
द्वौ मासौ पञ्चगव्येन षण्मासं कृच्छ्रमाचरेत् ६
मातरं गुरुपत्नीं च स्वसारं दुहितां तथा
गत्वा तु प्रविशेदग्निं नान्या शुद्धिर्विधीयते ७
अस्तं गते यदा सूर्ये चाण्डालमृतुमत्स्त्रियः
संस्पृशेत्तु यदा कश्चित्प्रायश्चित्तं कथं भवेत् ८
जातरूप्यं सुवर्णं तु दिवाऽऽहृतं च यज्जलम्
तेन स्नात्वा च पीत्वा च गामालभ्य विशुध्यति ९
दासनापितगोपालकुलमित्रार्धसीरिणः
एते शूद्रास्तु भोज्यान्ना यश्चाऽऽत्मानं निवेदयेत् १०
असच्छूद्रेषु अन्नाद्यं ये भुञ्जन्त्यबुधा द्विजाः
प्रायश्चित्तं तथा प्राप्तं चरेच्चान्द्रायणव्रतम् ११
यः करोत्येकरात्रेण वृषलीसेवनं द्विजः

तद्भक्षणे जपेन्नित्यं त्रिभिर्वर्षैर्व्यपोहति १२
वृषलीं यस्तु गृह्णाति ब्राह्मणो मदमोहितः
सदा सूतकिता तस्य ब्रह्महत्या दिने दिने १३
वृषलीगमनं चैव मासमेकं निरन्तरम्
इह जन्मनि शूद्रत्वं पुनः श्वानो भविष्यति १४
वृषलीफेनपीतस्य निःश्वासोपगतस्य च
तस्यां चैव प्रसूतस्य निष्कृतिर्न विधीयते १५
अग्रे माहिषकं दृष्ट्वा मध्ये च वृषलीपतिम्
अन्ते वार्धुषिकं दृष्ट्वा निराशाः पितरो गताः १६
महिषीत्युच्यते भार्या सा चैव व्यभिचारिणी
तान्दोषान्क्षमते यस्तु स वै माहिषकः स्मृतः १७
पितुर्गेहे तु या कन्या पश्यत्यसंस्कृता रजः
भ्रूणहत्या पितुस्तस्य कन्या सा वृषली स्मृता
यस्तां विवाहयेत्कन्यां ब्राह्मणो मदमोहितः
असंभाष्यो ह्यपाङ्क्तेयः स विप्रो वृषलीपतिः १९
प्राप्ते तु द्वादशे वर्षे कन्यां यो न प्रयच्छति
मासि मासि रजतस्याः पिता पिबति शोणितम् २०
अष्टवर्षा भवेद्गौरी नववर्षा च रोहिणी
दशवर्षा भवेत्कन्या अत ऊर्ध्वं रजस्वला २१
माता चैव पिता चैव ज्येष्ठभ्राता तथैव च
त्रयस्ते नरकं यान्ति दृष्ट्वा कन्यां रजस्वलाम् २२
समर्घं धनमुत्सृज्य महर्घं यः प्रयच्छति
स वै वार्धुषिको ज्ञेयो ब्रह्मवादिषु गर्हितः २३
शुक्रक्षयकरा वन्ध्या त्याज्येति परिकीर्तिता
तस्यास्तु यो भवेद्भर्ता तं तु विद्यादजाविकम् २४
दूराच्छ्रान्तं भयग्रस्तं ब्राह्मणं गृहमागतम्
अनर्चयित्वा यो भुङ्क्ते तत्क्षणेऽसौ विधीयते २५
अजाविको माहिषश्च तथा च वृषलीपतिः

तृणाग्रेणापि संस्पृष्ट्वा सवासा जलमाविशेत् २६
यावदुष्णं भवेदन्नं यावद्भुञ्जन्ति वाग्यताः
पितरस्तावदश्नन्ति यावन्नोक्ता हविर्गुणाः २७
हविर्गुणा न वक्तव्याः पितरो यान्त्यतर्पिताः
पितृभिस्तर्पितैः पश्चाद्वक्तव्यं शोभनं हविः २८
यावतो ग्रसते ग्रासान्हव्यकव्येष्वमन्त्रितः
तावतो ग्रसते प्रेत्य दीप्तान्ग्रासानयोमयान् २९
आसनेष्वासनं दद्यान्न तु हस्ते कदाचन
हस्तेष्वासनदाने च निराशाः पितरो गताः ३०
आसने पादमारूढो वस्त्रस्यार्धमधः कृतम्
मुखेन धमितं भुङ्क्ते द्विजश्चान्द्रायणं चरेत् ३१
अङ्गुल्यां यः पवित्राणि कृत्वा गन्धान्समर्चयेत्
पितॄणां नोपतिष्ठेत राक्षसैर्विप्रलुप्यति ३२
हसन्ग्रासं च यो भुङ्क्ते सशब्दं सेङ्गितं तथा
लेहितं वर्तितं चैव षडेते पङ्क्तिदूषकाः ३३
श्वित्री कुष्ठी तथा शूली कुनखी श्यावदन्तकः
रोगी हीनातिरिक्ताङ्गः पिशुनो मत्सरी तथा ३४
दुर्भगो हि तथा षण्ढः पाखण्डी वेदनिन्दकः
हैतुकः शूद्रयाजी च अयाज्यानां च याजकः ३५
नित्यं प्रतिग्रहे लुब्धो याचको विषयात्मकः
श्यावदन्तोऽथ वैद्यश्च असदालापकस्तथा ३६
एते श्राद्धे च दाने च वर्जनीयाः प्रयत्नतः
तथा देवलकश्चैव भृतको वेदविक्रयी ३७
एते वर्ज्याः प्रयत्नेन एवमेव यमोऽब्रवीत्
निराशाः पितरस्तस्य भवन्ति ऋणभागिनः ३८
अथ चेन्मत्रविद्युक्तो वैष्णवो ज्ञानवान्हि सः
हव्यकव्ये नियोक्तव्य इति प्राह स्वयं यमः ३९
तस्मात्सर्वप्रयत्नेन श्राद्धे यज्ञे च कर्मणि

अदूष्यं चैव विप्रेन्द्रं योजनीयं प्रयत्नतः ४०
तथैव मन्त्रविद्युक्तः शारीरैः पङ्क्तिदूषणैः
वर्जितं च यमः प्राह पङ्क्तिपावन एव सः ४१
निर्मत्सरः सदाचारः श्रोत्रियो ब्रह्मविद्युवा
विद्याविनयसंपन्नः पात्रभूतो द्विजोत्तमः ४२
वेदान्तविज्ञयेष्ठसामा अलुब्धो वेदतत्परः
योजनीयः प्रयत्नेन दैवे पित्र्ये च कर्मणि
यदत्तं च हुतं तस्मै ह्यनन्तं नात्र संशयः ४३
उच्छिष्टोच्छिष्टसंस्पृष्टः शुना शूद्रेण वा द्विजः
उपोष्य रजनीमेकां पञ्चगव्येन शुध्यति ४४
उच्छिष्टभाजनं येन विप्रेण चान्नवर्जितम्
स्पृष्टं तेन प्रमादाच्च प्राजापत्यं समाचरेत् ४५
उच्छिष्टोच्छिष्टसंस्पृष्टो ब्राह्मणो ब्राह्मणेन हि
दशरुद्रीं जपेत्पश्चाद्गायत्र्या शोधनं परम् ४६
उच्छष्टोच्छिष्टसंस्पृष्टः क्षत्रियो वैश्य एव च
प्रमादोच्छिष्ट संस्पृष्टः शूद्रेण तु यदा द्विजः ४७
उपोष्य रजनी रजनीमेकां पञ्चगव्येन शुध्यति
श्वानकुक्कुटमार्जाराः काको वा स्पृशते यदि ४८
उच्छिष्टं तं द्विजं यस्तु अहोरात्रेण शुध्यति
पञ्चगव्येन शुद्धिः स्यादित्याह भगवान्यमः ४९
रजस्वलां स्पृशेद्यस्तु त्रिरात्रं तत्र कारयेत्
उपोष्य द्विजसंस्कारं पञ्चगव्येन शुध्यति ५०
उदक्या दृष्टिपातेन श्रुतशब्देन चैव हि
स्नानं देवार्चनं दानं हवनं च प्रणश्यति ५१
रक्तवस्त्रस्य विक्रेता लाक्षारजकमेव च
वेणुजीवनकैवर्ततक्षचर्मोपजीविनः ५२
एतेषां स्पर्शनात्पापं तथा चैव तु मोहितः
प्रतिग्रहाच्च विप्रो वै नरकं प्रति गच्छति ५३

उदक्याः स्पर्शने चैव ब्राह्मणो वै प्रमादतः
षड्रात्रोपोषितः स्नात्वा पञ्चगव्येन शुध्यति ५४
सूतके वर्तमानेऽपि दासवर्गस्य का क्रिया
स्वामितुल्यं भवेत्तस्य सूतकं तु प्रशस्यते ५५
यन्न कारयते तत्तन्नान्यं प्रत्यब्रवीद्यमः
विवाहोत्सवयज्ञेषु कार्ये चैवमुपस्थिते ५६
रजः पश्यति या नारी तस्य कालस्य का क्रिया
विपुले च जले स्नात्वा शुक्लवासास्त्वलंकृता ५७
आपोहिष्ठेत्यृगभिषिक्ताऽऽयं गौरिति वा ऋचः
पूजान्ते होमयेत्पश्चाद् घृताहुत्या शताष्टकम् ५८
गायत्र्या व्याहृतिभिश्च ततः कर्म समाचरेत्
यावद्द्विजा न चार्च्यन्ते अन्नदानहिरण्यकैः ५९
तावच्चीर्णव्रतस्यापि तत्पापं न प्रणश्यति ६०
यद्देहकं काकबलाकचिल्लामेध्येन लिप्तं तु भवेत्कदाचित्
श्रोत्रे मुखे वा परिमस्तके वा ज्ञानेन लेपोपहतस्य शुद्धिः ६१
अभक्ष्याणामपेयानामलेह्यानां च भक्षणे
रेतोमूत्रपुरीषाणां प्रायश्चित्तं कथं भवेत् ६२
पद्मोदुम्बरबिल्वानां कुशाश्वत्थपलाशयोः
एतेषामुदकं पीत्वा पञ्चगव्येन शुध्यति ६३
स्त्रीणां रजस्वलानां च स्पर्शश्चैव भवेद्यदि
चतुर्णामपि वर्णानां प्रायश्चित्तं कथं भवेत् ६४
स्पृष्ट्वा रजस्वलाऽन्योन्यं सगोत्रा चान्यगोत्रका
कामादकामतो वाऽपि त्रिरात्राच्छुद्धिरिष्यते ६५
स्पृष्ट्वा रजस्वलाऽन्योन्यं ब्राह्मणी क्षत्रिया तथा
अर्धकृच्छ्रं चरेत्पूर्वा पादकृच्छ्रं तथोत्तरा ६६
स्पृष्ट्वा रजस्वलाऽन्योन्यं ब्राह्मणी वैश्यिनी तथा
पादहीनं चरेत्पूर्वा पादमेकं तथोत्तरा ६७
स्पृष्ट्वा रजस्वलाऽन्योन्यं ब्राह्मणी शूद्रिणी तथा

कृच्छ्रेण शुध्यते शूद्री ब्राह्मी दानेन शुध्यति ६८
विप्रः स्पृष्टो निशायां तूदक्याया पतितेन वा
दिवाऽऽनीतेन तोयेन स्नापयेदग्निसंनिधौ ६९
दिवा चैवार्कसंस्पृष्टं रात्रौ नक्षत्रदर्शनात्
संध्ययोरुभयोर्वाऽपि पवित्रं सर्वदा जलम् ७०
इति श्रीयाम्ये धर्मशास्त्रे तृतीयोऽध्यायः

चतुर्थोऽध्यायः
अथ गोवधप्रायश्चित्तवर्णनम्

स्वातं वापी तथा कूपपाषाणे शस्त्रघातिते
यष्ट्या तु घातिते चैव मृत्पिण्डान्येव साधयेत् १
गोवधे चैव यत्पापं बलीवर्दस्य चैव हि
प्रायश्चित्तं भवेत्तत्र स्त्रिया वा पुरुषस्य वा २
खाते च पतिता या गौः कूपे वा चावटेऽपि वा
आशावालकुडे वाऽपि शस्त्रघातेन चैव हि
यष्ट्या तु पतिता या गौर्बलीवर्दो मृतोऽपि वा
वत्सो वत्सतरो वाऽपि प्रायश्चित्ती भवेन्नरः ४
नारी वाऽपि कुमारो वा प्रायश्चित्ताद्विशुध्यति
पापी प्रख्यापयेत्पापं दत्त्वा धेनुं तथा वृषम् ५
प्रच्छन्नपापिनो ये स्युः कृतघ्ना दुष्टचारिणः
नरकेषु च पच्यन्ते यावदाभूतसंप्लवम् ६
तस्माच्च पापिना ग्राह्यं प्रायश्चित्तं यथा तथा
प्रमादाच्च हता येन कपिला वा तथेतरा ७
यथा ब्रह्मवधे पापं कपिलाया वधे तथा
बलीवर्देऽपि च तथा प्रायश्चित्तं समं स्मृतम् ८
रोधने बन्धने चैव मृत्पिण्डनगोमये
उत्कृष्टेनापि गोहन्ता प्रायश्चित्तेन शुध्यति ९
मुष्ट्या वा निहता या गौः शकटे धारिपङ्क्तयोः

गोवर्तपतिता गावः श्वनद्यामुत्तरेऽपि वा १०
एतत्ते कथितं सर्वं गवां च घातमुत्तमम्
यत्र यत्र म्रियेद्गौश्च प्रायश्चित्तं पृथक्पृथक् ११
वने च पतिता या गौः पामरत्राटशङ्किता
मृता चैव यदा सा गौः प्रायश्चित्ती भवेच्च सः १२
प्रेषितः पुरुषो वाऽपि प्रायश्चित्तं च यत्स्मृतम्
आब्दिकं चैव शूद्रस्य वैश्यस्य द्विगुणं भवेत् १३
त्रिगुणं क्षत्रियस्यैव विप्रस्यैव चतुर्गुणम्
गोष्ठे निवसनं कार्यं गोघ्नोऽहमिति वाचयेत् १४
कष्टेन वर्तमानोऽपि कालेनैव शुचिर्भवेत्
गवां मध्ये वसेद्रात्रौ दिवा गा वै ह्यनुव्रजेत् १५
न स्त्रीणां वपनं कुर्यान्न च गोव्रजनं स्मृतम्
न च गोष्ठे वसेद्रात्रौ न कुर्याद्वैदिकीं श्रुतिम् १६
सर्वान्केशान्समुच्छ्रित्य च्छेदयेदङ्गुलद्वयम्
एष एव तु नारीणां शिरोमुण्डापनं स्मृतम् १७
सूतके मृतके चैव विधिं प्रब्रूहि नो यम
जातके वर्तमानेऽपि मृतकं च यदा भवेत् १८
को विधिः स विनिर्दिष्टः कथयस्व यथातथम्
एवमुक्तो हि भगवान्यमः प्राह यथातथम् १९
जातके नैव मृतकं क्षयं याति न संशयः
पूर्वव्रतमनिर्दिष्टं मया च सूतकं भवेत् २०
सूतकेन न लिप्येत इति प्राह स्वयं यमः
सूतकेन न लिप्येत व्रतं संपूर्णतां व्रजेत् २१
श्राद्धं दानं तपो यज्ञो देवताराधनं तथा
ब्रह्महा च सुरापश्च स्वर्णस्तेयी गुरुद्रुहः २२
संसर्गी पञ्चमो ज्ञेयस्तत्समो नात्र संशयः
एतेषु द्वादशाब्दं च प्रायश्चित्तं विधीयते २३
तथा पातकिनां चैव षडब्दं चैव संस्मृतम्

उपपातकिनां चैव त्रिपञ्चाब्दं विधीयते २४
प्राजापत्यैस्त्रिभिः कृच्छ्रं कृच्छ्रं वै द्वादशाब्दिकम्
एकभक्तं तथा नक्तमुपवासमथापि वा २५
एतद्दिनचतुष्केण पादकृच्छ्रश्च जायते
त्रिपादकृच्छ्रो विज्ञेयः पापक्षयकरः स्मृतः २६
धर्मशास्त्रानुसारेण प्रायश्चित्तं मनीषिभिः
दातव्यं पापमुक्त्यर्थं प्राणिनां पापकारिणाम् २७
अनुतापाद्यपो यदा पुंसां भवेद्वै पापिनः
प्रायश्चित्तं तदा देयमित्याह भगवान्यमः २८
अज्ञात्वा धर्मशास्त्राणि प्रायश्चित्तं ददाति यः
प्रायश्चित्ती भवेत्पूतस्तत्पापं पर्षदं व्रजेत् २९
तस्माच्छास्त्रानुसारेण प्रायश्चित्तं विधीयते
अष्टशाल्यां मृता ये च ये च स्त्रीसूतके मृताः ३०
द्रंष्ट्राभिर्भक्षिता ये च ये च आत्महनो जनाः
अष्टशाल्यां मृतो विप्रः प्रायश्चित्तं तु बन्धुभिः ३१
कार्यं तु आब्दिकं चैव तथा स्त्रीणां च दापयेत्
शुद्ध्यर्थं नान्यथा भाव्यमित्याह भगवान्यमः ३२
दुर्मृत्युमरणं प्राप्ता येऽप्यधोगतिमागताः
तेषां शुद्ध्यर्थमेवात्र द्वित्र्यब्दं हि विशिष्यते ३३
ब्राह्मणक्षत्रियविशां शूद्राणां चान्त्यजातिनाम्
तारतम्येन दातव्यमिति प्राह स्वयं यमः ३४
पतितानां च विप्राणां तथा स्त्रीणां विगर्हितम्
कथं शुद्धिर्भवेत्तासां तेषां चैव विशेषतः ३५
व्यभिचारादृतौ शुद्धिः स्त्रीणां चैव न संशयः
गर्भे जाते परित्यागो नान्यथा मम भाषितम्
दुष्टस्त्रीदर्शनेनैव पितरो यान्त्यधोगतिम्
घृतं योन्यां क्षिपेद्धोरं परपुंसगता हि या ३७
हवनं च प्रयत्नेन गायत्र्या चायुतत्रयम्

ब्राह्मणान्भोजयेत्पश्चाच्छतमष्टोत्तरेण हि ३८
विधवा चैव या नारी पुंसोपगतसेविनी
त्याज्या सा बन्धुभिश्चैव नान्यथा यमभाषितम् ३९
पतितस्य च विप्रस्य अनुतापरतस्य च
पापाच्चैव निवृत्तस्य प्रायश्चिती भवेत्तदा ४०
तारतम्येन दातव्यं प्रायश्चित्तं यथाविधि
सकामो हि यदा विप्रः पापाचारपरो भवेत् ४१
दृष्ट्वा निवृत्तपापौघः प्रायश्चित्ती तदाऽर्हति
तथा क्षत्रियवैश्यौ वा शूद्रा वाऽपि यथाक्रमात् ४२
विधवागमने पापं सकृच्चैव तु यद्भवेत्
असकृच्च यदा ज्ञात्वा प्रायश्चित्तं प्रवर्तते ४३
असकृद्गमनाच्चैव चरेच्चान्द्रायणद्वयम्
सकृद्गगने यत्पापं प्राजापत्यद्वयेन हि ४४
पुनर्भूर्विकृता येन कृता विप्रेण चैव हि
विना शाखाप्रभेदेन पुनर्भर्भरणयते हि सा ४५
सवर्णश्च सवर्णायामभिषिक्तो यदा भवेत्
ब्राह्मणः कामलुब्धोऽपि श्राद्धे यज्ञे च गर्हितः ४६
क्षत्रियो ब्राह्मणीसक्तः क्षत्रिणयां विश एव वा
वैश्याया गमने शूद्रः पतिताया भवान्यथा ४७
प्रातिलोम्ये महत्पापं प्रवदन्ति मनीषिणः
प्रायश्चित्तं चाऽऽनुलोम्ये न भवत्येव चान्यथा ४८
मानसं वाचिकं चैव कायिकं पातकं स्मृतम्
तस्मात्पापाद्विशुद्ध्यर्थं प्रायश्चित्तं दिने दिने ४९
प्रातः संध्यां सनक्षत्रामुपास्यामेव यत्नतः
मध्याह्ने च तथा रौद्रीं सायं चैव तु वैष्णवीम् ५०
त्रिविधं पापशुद्ध्यर्थं संध्योपासनमेव च
संध्याहीनो हि यो विप्रः स्नानहीनस्तथैव च ५१
स्नानहीनो मलाशी स्यात्संध्याहीनो हि भ्रूणहा

नैशं पापं हि यां ध्यात्वा उपासनपरो हि सः ५२
ब्रह्मलोकं व्रजत्येव नान्यथा यमभाषितम्
विद्यातपोभ्यां संयुक्तः शान्तः शुचिरलम्पटः ५३
अलुब्धाह्लादनिष्पापा भूदेवा नात्र संशयः
पात्रीभूताश्च विज्ञेया विप्रास्ते नात्र संशयः ५४
तेभ्यो दत्तमनन्तं हि इत्याह भगवान्यमः
कुकर्मस्थास्तु ये विप्रा लोलुपा वेदवर्जिताः ५५
संध्याहीना व्रतभ्रष्टाः पिशुना विषयात्मकाः
तेभ्यो दत्तं निष्फलं स्यान्नात्र कार्या विचारणा ५६
प्रतिग्रहे संकुचिता यदान्यातैयविधृता
भूमिदर्शनात्पापमोचकाकृतत्रेताद्वापरे कलौ नौवर्वीरोषितः ५७
राजप्रतिग्रहात्सर्वं ब्रह्मवर्चसमेव च
नश्यतीति न संदेह इत्याह भगवान्यमः ५८
राज्ञां प्रतिग्रहस्त्याज्यो लोकत्रयजिगीषुभिः
राज्ञः प्रतिग्रहाच्चैव ब्राह्मणयं हि विलुप्यते ५९
गावो दूरप्रचारेण हिरण्यं लोभलिप्सया
स्त्री विनश्यति गर्भेण ब्राह्मणो राजसेवया ६०
सेवकाश्चापि विप्राणां राज्ञां सुकृतनामभिः
कुम्भीपाकेषु पच्यन्ते यावदाभूतसंप्लवम् ६१
असेव्यासेविनो विप्रा अयाज्यानां च याजकाः
अपाङ्क्तास्ते च विज्ञेयाः सर्वधर्मबहिष्कृताः ६२

इति श्रीयाम्ये धर्मशास्त्रे चतुर्थोऽध्यायः

पञ्चमोऽध्यायः

अथ श्राद्धकाले पत्न्यां रजस्वलायां निर्णयः

अतः परं प्रवक्ष्यामि शृणुध्वं मुनिपुंगवाः
सर्वेषामन्त्यजातीनां वर्णादीनां यथाक्रमम् १
स्त्रीसंपर्कादिकं सर्वं जातमन्त्यजसंज्ञकम्

योनिसंकरजं सर्वं वर्णतश्चापि सर्वशः २
विप्रक्षत्रियविट्शूद्रा वर्णिजात्येष्वनुक्रमात्
एते ब्राह्मणकुत्साः स्युस्तस्माद्ब्राह्मणमुत्तमम् ३
वेदाचाररतो विप्रो वेदवेदाङ्गपारगः
तैरप्यनुष्ठितो धर्म उक्तश्चैव विशेषतः ४
कार्ये चैव विशेषेण त्रिभिर्वर्णैरतन्द्रितः
बलाद्दासीकृता ये च म्लेच्छचाण्डालदस्युभिः ५
अशुभं कारिताः कर्म गवादिप्राणिहिंसनम्
प्रायश्चित्तं च दातव्यं तारतम्येन वा द्विजैः ६
श्राद्धकाले यदा जाता पत्नी यस्य रजस्वला
प्रसूता वा न कार्ये च दैविकं पैतृकं तथा ७
ब्राह्मणा मन्त्रिताश्चैव क्षणिता वा प्रयत्नतः
उद्दिश्य पितृपाकं च कार्यं पैतृकमेव तत् ८
अशौचं न भवत्येव नात्र कार्या विचारणा
प्रस्थाने वा पिता तस्य पञ्चत्वं च गतो भवेत् ९
श्राद्धादिकं तु पुत्रेण अज्ञातेन कृतं यदा
कन्याप्रदानसमये श्रुतं च पितरं मृतम् १०
कन्यादानं च तत्कार्यं वचनाद्भवते क्षमः
पितुः पात्रादिकं कर्म पश्चात्सर्वं यथाविधि ११
अज्ञानाच्च कृतं सर्वं दैविकं पैतृकं च यत्
जातके सूतके वाऽपि तत्सर्वं सफलं भवेत् १२
व्यासेनोक्तस्मृतौ स्वकीये अज्ञानात्पितरि मृते यदा
ज्ञातुसदैवकार्यं पितृकमेव वा १३
अनेके यस्य ये पुत्राः संसृष्टा हि भवन्ति च
ज्येष्ठेन हि कृतं सर्वं सफलं पैतृकं भवेत् १४
वैदिकं च तथा सर्वं भवत्येव न संशयः
पृथक्पिण्डं पृथक्श्राद्धं वैश्वदेवादिकं च यत् १५
भ्रातरश्च पृथक्कुर्युर्नाविभक्ताः कदाचन

अपुत्रस्य च पुत्राः स्युः कर्तारः सांपरायणाः १६
सफलं जायते सर्वमिति शातातपोऽब्रवीत्
न च दत्तो अहीनोऽतिस्नेहेन च तथापरः १७
बलादृहीतो बद्धश्च बन्धुभिर्दत्त एव च
भ्रातुः पुत्रो मित्रपुत्रः शिष्यश्चैव तथौरसः १८
अपुत्रस्य च विज्ञेया दायादा नात्र संशयः
नवैते पुत्रवत्पाल्याः परलोकप्रदा ह्यमी १९
औरसेन समाज्ञेया वचसोद्दालकस्य च
इदानीं भागनिर्णेयमृषिः शातातपोऽब्रवीत् २०
ज्येष्ठेन वा कनिष्ठेन विभागस्य विनिर्णयः
समभागप्रदाता च अपुत्रेभ्यो न संशयः २१
समभागो ग्रहीतव्यः पुत्रमत्या सदैव हि
पितृभ्यो भ्रातृपुत्रेभ्यो दायादेभ्यो यथाक्रमात् २२
अधिकस्य च भागौ द्वावितरेभ्यः समासतः
आधौ प्रतिग्रहे क्रान्ते पूर्वा तु बलवत्तरा २३
सर्वेष्वेव विवादेषु बलवत्युत्तरा क्रिया
समविद्योत्तरं चैव प्रत्यवस्कन्दनं तथा २४
पूर्वं न्यासविधिश्चैव उत्तरः स्याच्चतुर्विधः
साक्षिषूभयतः सत्सु साक्षिणः पूर्ववादिनः २५
पूर्वपक्षेऽधरीभूते भवन्त्युत्तरवादिनः
असाक्षिव्यवहारेषु दिव्यं देयं यथाविधि २६

इति श्रीयाम्ये धर्मशास्त्रे पञ्चमोऽध्यायः
समाप्तेयं बृहद्यमस्मृतिः

Reference: *Smriti Sandarbha, Collection of Thirteen Dharmashastric Texts by Maharshis, Vol. 4*. Nag Publishers: Delhi, 1988, pp. 2083-2118.